अथ ऋणमोचन भौमपूजाप्रयोगः

तत्र व्रतकर्ता भौमवासरे मुहूर्तावशिष्टायां रात्रावुत्थाय आवश्यकान्ते शुचिर्गुर्वादिस्मरणपूर्वकं मङ्गलाचरणं पठेत् ।

कनकमयशरीरस्तेजसादुर्निरीक्ष्यो ।

हुतवहसमकान्तिमालवे यस्य जन्म ।

अवनितनय एष श्रूयते भारते यः ।

सृजतु मम विभूति मङ्गलः सुप्रभाते ।। इति ।

ततोऽरुणोदयवेलायामपामार्गेण दन्तधावनं विधाय तिलामलकचूर्णेन नद्यादौ स्नात्वा धौतमारक्तवत्रं रक्तोत्तरीयं च परिधाय स्तोत्रपारायण अनुष्ठान संकल्पम् कुर्यात्–

ॐ विष्णुः ३ अद्येहेत्यादि अमुकोऽहं सपत्नीकः ऋणव्याधिनाशार्थं पुत्रधनप्राप्तये च ऋण मोचन भौम स्तोत्र पाठं करिष्ये ।

ततो रक्तगोगमयेन रक्तचन्दनसंपृक्तेन शुद्धदेशे भूमि विलिप्य तत्र पूर्वोक्तं यन्त्र संस्थाप्यरक्तवर्तिकोपेतं दीप प्रज्वलय्य स्वासने उपविश्य आचम्य सुमुखश्चेत्यादिना गणेशाय पुष्पाञ्जलिं समर्प्य सामान्यार्घ्यस्थापनादि रक्तगन्धाक्षतपुष्पदूर्वासम्पन्नविशेषार्घ्य स्थापनान्तं

विधाय पूजासंकल्पं कुर्यात्-

ॐ विष्णुः ३ अद्येहेत्यादि अमुकोऽहं मम ऐहिकामुष्मिऋणापाकरणपूर्वक धनपुत्रावाप्तये ऋणमोचन भौमस्तोत्र पाठाङ्गत्वेन लिखितयन्त्रपीठे यथामिलितोपचारैः पूजनं करिष्ये । तत्पूर्वाङ्गत्वेन कवचन्यासादिकं च करिष्ये ।।

अस्य श्रीमङ्गलकवचमन्त्रस्य भार्गवऋषिदेवीगायत्रीच्छन्दः, ऋणहर्ता धनप्रदो भूमिपुत्रोऽङ्गारको देवता, ममाभीष्ट सिद्धये जपे विनियोगः ।

ऋष्यादि न्यास

ॐ भार्गवऋषये नमः शिरसि , देवीगायत्रीछन्दसे नमो मुखे । मङ्गलदेवतायै नमो हृदये। मङ्गल देवता प्रीतये जपे विनियोगः नमः सर्वांगे।

ॐ ह्रीं श्रीं म्लूं मङ्गलाय नमः इति मूलमन्त्रेण

प्राणायामत्रयं कृत्वा जपेत् ।।

ॐ शिखायां मङ्गलः पातु भूमिपुत्रस्तु मूर्धनि ।।

ललाटे ऋणहर्ता च चक्षुषोश्च धनप्रदः ॥

स्थिरासनः श्रवणयोर्महाकायस्तु नासयोः । ।

आस्यदन्तोष्ठजिह्वास सर्वकर्माविरोधकः ॥

हनौ मे लोहितः पातु कण्ठे लोहितलोचनः । ।

स्कन्धयोरुभयो रक्षेत सामगानां कृपाकरः ॥

धरात्मजो थुजौ पातु कुजो रक्षेत्करद्वयम् । ।

भौमो मे हृदयं पातु भूतिदस्तु तथोदरे ॥

भूनन्दनस्तु स्तनयोः कटिमङ्गारकोऽवतु ।।

नाभिस्थानं सदा रक्षेत्तथैव यमसंज्ञकः ॥

वस्तिमेढो तथा रक्षेत्सर्वरोगापहारकः । ।

पातूर्वोवृष्टिकर्ता च त्वपहत च जानुनी ॥

पादाङ्गुष्ठौ च पादौ च सर्वकर्मफलप्रदः ।।

पातु में पूर्वतः शूलं गदा रक्षतु दक्षिणे ।।

पश्चिमे च धनू रक्षेदुत्तरे च शरस्तथा ।।

ऊर्ध्वं पडाननः पायाधस्तात्पृथिवी तथा ।।।

एवं तु कवचं कृत्वा ततः पूजा समाचरेत् । इति ।

तत्रादौ रक्ताक्षतैः पीठपूजां कुर्यात् ।

रक्तप्रभायै नमः । रक्ताक्ष्यै० । सुरक्तचरणायै० । अति- रक्तसुगन्धायै० । रक्तवसनायै० । रक्तदंष्ट्रायै० । रक्ताभरणायै० ।। रक्ताङ्गायै०

दिक्पाल पूजनं

इन्द्राय० । अग्नये० । यमाय० । निर्झतये० । वरुणाय० । वायवे० । सोमाय० । ईशानाय० ।

ब्रह्मणे० । अनन्ताय० ।

अस्त्र पूजनं

वज्राय० । शक्तये० । दण्डाय० । खड्गाय० । पाशाय० । अङ्कुशाय० । गदायै० । त्रिशूलाय० । कमण्डलवे० । चक्राय० ।

ग्रह पूजनं

आदित्याय० । सोमाय० । भौमाय० । बुधाय० । गुरवे० । शुक्राय० । शनैश्चराय० । राहवे० । केतवे० ।

नक्षत्र तिथि राशि देवता पूजनं

अश्विन्याद्यष्टाविंशतिनक्षत्रेभ्यः०। प्रतिपदादिषोडशतिथिभ्यः० । मेषादिद्वादशराशिभ्यः०।।

भौम यन्त्र पूजनं

एकविंशतित्रिकोणमण्डलस्य चतुर्दिक्षु-

पृथिव्यै० । स्कन्दाय० । गणेशाय० । दुर्गायै०

एकविंशतित्रिकोणेषु–

मङ्गलाय० । भूमिपुत्राय० । ऋणहर्त्रे० । धनप्रदाय० । स्थिरासनाय० । महाकायाय० । सर्वकर्मावरोधकाय० । लोहिताय० । लोहिताक्षाय० । सामगानां कृपाकराय०। धरात्मजाय० । कुजाय० । भौमाय० । भूतिदाय०। भूमिनन्दनाय० । अङ्गारकाय० । यमाय० । सर्वरोगापहारकाय० । वृष्टिकर्त्रे० । अपहर्त्रे० । सर्वकर्मफलप्रदाय० ।

त्रिकोणमध्येषु

मङ्गलाय सायुधाय सपरिवाराय सवाहनाय नमः ।

अथ प्रतिष्ठा-

"एतन्ते०" "मनोजूतिः०' इत्यन्ते ॐ भूर्भुवःस्वः

सपरिवार भौमदेव इहागच्छ इह तिष्ठ सुप्रतिष्ठितो वरदो भव ।

अथ ध्यानम्-

बालार्कारुणविग्रहं परिलसद्बन्धूकवस्त्रावृतं ।
स्वाहाशक्तियुतं सुरक्तनयनं युक्तं चतुर्भिर्भुजैः ।।
शक्ति शूलमथो गदां च विमलां निस्त्रिंशमाबिभ्रतं।
भक्तानुग्रहकारिणं धरणिजं ध्यायेत्स्वहृत्पङ्कजे।।

ॐ ह्रीं श्रीं म्लूं मङ्गलाय नमः

ॐ अङ्गारकाय विद्महे, शक्तिहस्ताय धीमहि । तन्नो भौमः प्रचोदयात् ।

ततो पूजनं कुर्यात्

आवाहनम्

भूमिपुत्रं महाबाहुं सर्वेषां च वरप्रदम् ।।

सर्वदुःखहरं देवं भौममावाहयाम्यहम् ॥

आसनम्-

सुवर्णक-पटन्यस्तं नानारत्नविभूषितम् ।।

आसनं च मया दत्तं गृहाण ऋणमोचन ।।

पाद्यम्-

स्वर्गङ्गोदकमेतत्तु सुवर्णकलशाहृतम् ।

पाद्यार्थं च मयाऽऽनीतं धनदातर्नमोऽस्तु ते ॥

अर्घ्यम्-

मन्दाकिनीजलं चैव नानागन्धसमन्वितम् ।

अयं गृहाण देवेश मङ्गलाय नमोऽस्तु ते ॥

मूलेनाचमनं मधुपर्क च दद्यात् ।

ततः पञ्चामृतस्नानम्-

गव्यमाज्यं दधि सर्पिः शर्करा पञ्चमं मधु ।।

एकत्र नीतं विज्ञेयं दिव्यं पञ्चामृतं महत् ॥

शुद्धोदकस्नानम्-

गङ्गाजले समानीतं नानागन्धसमन्वितम् ।

स्नानार्थं धरणीसूनो त्वं गृहाण नमोऽस्तु ते ॥

मूलेन स्नानाङ्गमाचमनीयम् ।

वस्त्रम्-

दिव्यं क्षौममयं देव वरदो भव भूमिज ।।

रक्तवस्त्रं गृहाणेदं भौम स्कन्दसमप्रभ ।।

वस्त्राङ्गमाचमनम् ।

यज्ञोपवीतम्-

आदि शंकर वैदिक विद्या संस्थान

दूरभाष: 9044016661

ब्रह्मविष्णुमहेशाननिर्मितं ब्रह्मसूत्रकम् ।
उपवीतं सोत्तरीयं गृहाण धरणीसुत ॥
यज्ञोपवीताङ्गमाचमनम् ।

भूषणम्-

रत्नैरनेकैः खचितं भूषण कनकोज्ज्वलम् ।।
स्वभावसुन्दरेशान मत्श्रीत्या प्रतिगृह्यताम् ॥

गन्धः-

श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
अनुलेपनकं देव रक्तचन्दनसंयुतम् ॥
गृह्यतां धरणीसूनो वरदो भव मे प्रभो ।

अक्षताः--

अक्षताश्च सुरश्रेष्ठ कुङ्कुमक्ताः सुशोभनाः ।
मया निवेदिता भक्त्या गृहाण धरणीसुत ।।

पुष्पाणि-

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।

गृहाण धरणीखनो मत्प्रीत्या त्वं नमोऽस्तु ते ॥

धूपः-

वनस्पत्युद्भवो दिव्यो गन्धाढ्याः सुमनोहरः ।

आग्नेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

एकविंशतिदीपाः-

शश्वत्कर्पूरसुरभीकृतवर्तिसुसंस्कृतान् ।

दीपान गृहाण मे भौम एकविंशतिसंख्यकान् ।।

नैवेद्यम्

नैवेद्यं गृह्यतां देव गुडौदनसमन्वितम् ।

नानाभक्ष्यसमायुक्तं संशुद्धं धरणीधर ॥

आदि शंकर वैदिक विद्या संस्थान

दूरभाष: 9044016661

मूलमन्त्रेण मध्ये पानीयम् । क्षणं ध्यात्वा यथाशक्ति मूलमन्त्रं प्रजप्य नैवेद्यमुद्वास्य मूलेन पुनराचमनीयम् । करोद्वर्तनार्थे चन्दनम् ।

फलम्-इदं फलं० ।

ताम्बूलम्-

लवङ्गचूर्णखदिरपूगैलादिविमिश्रितान् ।

ताम्बुलान् सफलान् देव गृहाण धरणीसुत ॥

एकविंशतिनमस्कारान् प्रदक्षिणां च समर्प्य रक्तगन्धाक्षतपुष्पफलसंयुतमर्घ्यं गृहीत्वा-

विशेषार्घ्यम्

भूमिपुत्र महातेजः स्वेदोद्भव पिनाकिने ।

धनार्थी त्वां प्रपन्नोऽस्मि गृहाणार्यै नमोऽस्तु ते ॥

भूमिपुत्र महाकाय भक्तानां भूतिवर्धन । ।

गृहाणार्यं मया दत्तं मम स्वस्तिकरो भव । ।

प्रसीद देवदेवेश विघ्नहन्तर्धरात्मज ।
गृहाणायं मया दत्तं भूमिपुत्र नमोऽस्तु ते ॥
इति दद्यात् ।

नीराजनम्-अन्तस्तेजः० ।
पुष्पाञ्जलिः–राजाधिराजाय० ।
प्रार्थना-
कुमारं भूतिदं देवं धनदं च ऋणापहम् ।
व्रजामि शरणं भौमं सर्वसिद्धिप्रदायकम् ॥
अङ्गारक महीपुत्र भगवन्भक्तवत्सल ।
नमस्तेऽस्तु ममाशेषमृणमाशु विमोचय ।।
धरणीगर्भसंभूतं विद्युत्कान्तिसमप्रभम् ।
कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम् । ।

आदि शंकर वैदिक विद्या संस्थान
दूरभाष: 9044016661

ऋणरोगादिदारिद्यपापक्षुदपमृत्यवः ।
भयरोगमनस्तापा नश्यन्तु मम सर्वदा । ।
भूमिपुत्र दयासिन्धो दुःखशोकविनाशन ।। ।
सुखं देहि धनं देहि त्वामहं शरणं गतः ।।

पुनश्च ऋणमोचन अंगारकस्तोत्र पाठं अहं करिष्ये इति संकल्प्य स्तोत्र पाठं कुर्यात्

ऋणमोचकमङ्गलस्तोत्रम्

श्रीगणेशाय नमः॥

मङ्गलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः ।
स्थिरासनो महाकायः सर्वकर्मविरोधकः ॥ १॥

आदि शंकर वैदिक विद्या संस्थान
दूरभाष: 9044016661

लोहितो लोहिताक्षश्च सामगानां कृपाकरः ।
धरात्मजः कुजो भौमो भूतिदो भूमिनन्दनः ॥ २॥

अङ्गारको यमश्चैव सर्वरोगापहारकः ।
वृष्टेः कर्ताऽपहर्ता च सर्वकामफलप्रदः ॥ ३॥

एतानि कुजनामानि नित्यं यः श्रद्धया पठेत् ।
ऋणं न जायते तस्य धनं शीघ्रमवाप्नुयात् ॥ ४॥

धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम् ।
कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम् ॥ ५॥

स्तोत्रमङ्गारकस्यैतत्पठनीयं सदा नृभिः ।
न-तेषां-भौमजा-पीडा-स्वल्पापि-भवतिक्वचित्॥६

अङ्गारक महाभाग भगवन्भक्तवत्सल ।
त्वां नमामि ममाशेषमृणमाशु विनाशय ॥ ७॥

ऋणरोगादिदारिद्र्यं ये चान्ये ह्यपमृत्यवः ।

भयक्लेशमनस्तापा नश्यन्तु मम सर्वदा ॥ ८॥

अतिवक्र दुराराध्य भोगमुक्त जितात्मनः ।

तुष्टो ददासि साम्राज्यं रुष्टो हरसि तत्क्षणात् ॥ ९॥

विरिञ्चिशक्रविष्णूनां मनुष्याणां तु का कथा ।

तेन त्वं सर्वसत्त्वेन ग्रहराजो महाबलः ॥ १०॥

पुत्रान्देहि धनं देहि त्वामस्मि शरणं गतः ।

ऋणदारिद्र्यदुःखेन शत्रूणां च भयात्ततः ॥ ११॥

एभिर्द्वादशभिः श्लोकैर्यः स्तौति च धरासुतम् ।

महतीं श्रियमाप्नोति ह्यपरो धनदो युवा ॥ १२॥

इति श्रीस्कन्दपुराणे भार्गवप्रोक्तं ऋणमोचकमङ्गलस्तोत्रं सम्पूर्णम् ।

ततः 'आवाहनं न जानामि०' 'मन्त्रहीनं०' इति च पठित्वा देवं विसृज्य कर्मेश्वरार्पणं कुर्यात् ।।

।। इति ऋणमोचन भौमपूजाप्रयोगः ।।

आदि शंकर वैदिक विद्या संस्थान

दूरभाष: 9044016661